॥ ❀ अथ केदारखण्डस्थमायापुरीमाहात्म्यप्रारम्भः ❀ ॥

इति श्रीस्कंदपुराणांतर्गतकेदारखंडस्थमायाक्षेत्रमाहात्म्यांतर्वर्तिविषयानुक्रमणिका श्रेष्ठिवर्यश्रीकृष्णदासतनयश्रीगंगाविष्णुखेमराजनिदेशवर्तिरावेरग्रामनिवासिपरशुरामभट्टतनूजन्यगोविंदशर्मशास्त्रिविरचिता संपूर्णतामयासीत् ॥

किं० -।।।~] [गंगाविष्णु श्रीकृष्णदास श्रीवेङ्कटेश्वर छापखाना. (मुंबई.)

॥ श्रीनृसिंहः प्रसीदतु ॥

अथ श्रीस्कंदपुराणांतर्गतकेदारखंडस्थमायाक्षेत्रमाहात्म्यस्थविषयानुक्रमणिका.

हि ॥ यद्यप्युक्तानिभवतातीर्थानिविविधान्यपि ॥ १४ ॥ तथापिसंशयोमेद्यवर्ततेदेववंदित ॥ त्वन्मुखाद्देवदेवेशश्रुतंकाश्यां
हिविस्तरात् ॥ १५ ॥ गंगायांविभवश्चापिस्थितिश्चपरमात्मनः ॥ तेपिद्रोणादयोविप्राःक्षत्रियाःपांडवादयः ॥ १६ ॥ सं
सारदुःखसंतप्ताविचिन्वंतोमहेश्वरम् ॥ जग्मुःकैलासशिखरेकेदारेशुभदायके ॥ १७ ॥ कथंपुण्यमभूत्तत्तुस्थलंवैपरमात्म
नः ॥ काशींत्यक्त्वामहादेवोदृष्ट्वापांडवसत्तमान् ॥ १८ ॥ केनविज्ञातवांस्तेषांनिष्कृतिंशिवनंदन ॥ देवेशगोत्रहत्यायास्त
न्मेवदमहामते ॥ १९ ॥ कथमस्मिन्स्थलेरम्येगत्वाप्रापुःपरंपदं ॥ इतिमेसंशयंछिंधियदिभक्तेषुतेदया ॥ २० ॥ ॥ सूत
उवाच ॥ ॥ इतिश्रुत्वावचस्तस्यनारदस्यमहात्मनः ॥ ध्यात्वाक्षणंमहादेवंस्मृत्वातद्वचनंपरम् ॥ २१ ॥ उवाचप्रहसन्वा
क्यंवाक्यज्ञंवाग्विदांवरः ॥ नमस्कृत्यमहादेवंसर्वदेवनमस्कृतम् ॥ २२ ॥ ॥ स्कंदउवाच ॥ ॥ धन्योऽसित्वंमहाभा
गधन्यानांप्रवरोमुनिः ॥ त्वत्समोनास्तित्रैलोक्येभक्तोभक्तिमतांवरः ॥ २३ ॥ नमस्कृत्यप्रवक्ष्यामिचराचरगुरुंविभुम् ॥
सर्वस्यजगतोबीजंजन्मादिपरिवर्जितं ॥ २४ ॥ दिक्कालपरिणामानांजगदीशंजगन्मयम् ॥ अनादिमध्यनिधनंनमस्कृ
त्यब्रवीमिते ॥ २५ ॥ ब्रह्मांडाःकोटयोयस्यरोमांचविवरेषुवै ॥ महावातप्रेरिताश्चविशंतिप्रविशंतिच ॥ २६ ॥ यत्त्वयापरि
पृष्टोऽहंधर्मार्थसहितंवचः ॥ २७ ॥ तच्छृणुष्वमहाभागमनःकृत्वासुनिश्चलम् ॥ इदंक्षेत्रंतुयत्प्रोक्तंकेदाराख्यंसुपुण्यदं ॥

तच्छ्रुत्वापिनरोयातिशिवसायुज्यतांमुने ॥ २८ ॥ इमंदेशंसकृद्दृष्ट्वाकृतकृत्योभवेन्नरः ॥ यत्रब्रह्मादयोदेवाःशिवसंन्यस्तमा
नसाः ॥ २९ ॥ कथयामिमाहात्म्यंतेदेशस्यप्रवरंमुने ॥ शृणुष्वावहितोभूत्वागदितंमृडनंदनात् ॥ ३० ॥ नंदापर्वतमार
भ्ययावत्काष्ठागिरिर्भवेत् ॥ तावत्केदारकंक्षेत्रंशिवमंदिरमुत्तमम् ॥ ३१ ॥ रत्नस्तंभंसमारभ्यमायाक्षेत्रावधिस्मृतम् ॥
अतिपुण्यतमंस्थानंहिमालयपदांतिकम् ॥ ३२ ॥ अस्मिन्देशेतुयेमर्त्यावसंतिदृढनिश्चयाः ॥ तेषांभुक्तिर्महादेवमंतव्या
हिकरेस्थिता ॥ ३३ ॥ एतेसर्वेमहाभागादेवावैमुक्तिलालसाः ॥ मर्त्यजन्महिसुप्राप्ताःसर्वेतेमुक्तिहेतवे ॥ ३४ ॥ हिमाल
यभवानद्योगंगांभोभिर्विनिर्गताः ॥ गंगांबुसंभवायस्माद्गंगाएवनसंशयः ॥ ३५ ॥ अतस्तत्सलिलंपीत्वातत्रत्यामनुजाः
खलु ॥ कथंनस्युर्महाभागाःशिवाएवनसंशयः ॥ ३६ ॥ अतस्तत्सलिलंपातुमागतास्त्रिदिवौकसः ॥ गंगाचयमुनाचैववर्तेते
शुभदायके ॥ ३७ ॥ अतस्तत्पुण्यकथनेशक्तिःस्यात्कस्यभूसुर ॥ सर्वेषांदेशवर्य्याणामयंदेशःप्रशस्यते ॥ ३८ ॥ यत्रसाक्षा
न्महादेवोवसतेचमहामते ॥ ममोत्पत्तिश्चभगवन्देशयोश्चतथैवच ॥ ३९ ॥ बभूवसर्वदेवानांमुनीनांब्रह्मनंदन ॥ इदमेवम
हास्थानंपुराप्राहसदाशिवः ॥ ४० ॥ यस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ अहोभाग्यमहोभाग्यंगच्छतांवसतांतथा ॥
॥ ४१ ॥ मनसावचसायेवैगच्छंतिनिवसंतिच ॥ तएवत्रिषुलोकेषुभाग्यवंतोभवंतिच ॥ ४२ ॥ येवैहिमालयात्स्वच्छाद्विनि

 गतंमहाजलम् ॥ पिबंत्यमृतवद्विप्रसदाशिवपरायणाः ॥ ४३ ॥ तेषांवैवस्वतोराजादृष्टिगोचरगोनहि ॥ यथासर्वेषुदेवेषुश्री
 शिवःपरिकीर्तितः ॥ ४४ तथासर्वेषुदेशेषुहिमवद्देशकःस्मृतः ॥ यथासर्वेषुवेदेषुसामवेदःप्रकीर्तितः ॥ ४५ ॥ तथायंसर्वदे
शेषुदेशराजोविधीयते ॥ यथारण्येषुसर्वेषुनैमिषारण्यसंज्ञितम् ॥ ४६ ॥ तथायंसर्वदेशेषुहिमवद्देशसंज्ञितः ॥ यथासर्वाशि
लानांहिशालग्रामशिलावरा ॥ ४७ ॥ तथासर्वेषुतीर्थेषुतीर्थराजोयमीरितः ॥ यथानदीषुसर्वासुजान्हवीसमुदीरिता ॥ ४८ ॥
तथायंसर्वदेशेषुदेशराजोयमीरितः ॥ यथाभक्तेषुसर्वेषुभक्तराजोहिनारदः ॥ ४९ ॥ तथायंसर्वक्षेत्रेषुक्षेत्रःकेदारसंज्ञितः ॥
तेधन्यास्त्रिषुलोकेषुतेपूज्याःसर्वदैवतैः ॥ श्रीशिवेन्यस्तमनसोवसंत्यत्रनिरामयाः ॥ ५० ॥ ॥ सूतउवाच ॥ ॥ इतिश्रु
त्वामहाभागानारदोदेशनायकम् ॥ पुनःपप्रच्छतंस्कंदंतीर्थानांविस्तरंबुधः ॥ ५१ ॥ ॥ इतिश्रीस्कंदपुराणेकेदारखण्डेमा
यापुरीमाहात्म्येदेशप्रशंसानामप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ भोभोः षण्मुखसेनानीर्धन्योहंभुविनारदः ॥ योवैत्वन्मुखकंजाद्विनिर्गतं सुमधुप्रभो ॥ १ ॥ पिबा
मिश्रोत्रपुटकैःक्षुधामेबाधतेनहि ॥ इदानींश्रोतुमिच्छामितीर्थानिप्रवराणिभोः ॥ २ ॥ अन्यानिकानितीर्थानिकाःकाः
कथाःशुभावहाः ॥ अस्मिन्देशेमहादेवपुत्रराजनमोस्तुते ॥ ३ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुनारदवक्ष्यामितीर्थानिशुभ

॥ ॐ स्वस्ति श्रीगणेशायनमः ॥ ॥ सूतउवाच ॥ ॥ ततःपूर्वंमहाभागाःस्कंदोवैपार्वतीसुतः ॥ सर्वंकैलासमाहात्म्यंक
थयामाससुव्रताः ॥ १ ॥ श्रुत्वातुवरतीर्थानांमाहात्म्यंब्रह्मपुत्रकः ॥ पप्रच्छचततःस्कंदंगंगाद्वारस्यवैभवम् ॥ २ ॥ तत्रा
न्येषांचतीर्थानांपीतानांचतपोन्विताः ॥ सोऽपिस्कंदोमहादेवपुत्रःप्रोवाचसर्वशः ॥ ३ ॥ गंगाद्वारादितीर्थानांतथाचसरि
तांशुभम् ॥ माहात्म्यंकथयामासब्रह्मपुत्रायधीमते ॥ ४ ॥ नारदायचसर्वासांविद्यानांपारगोग्निजः ॥ येषांचश्रवणात्स
द्योमुच्यतेसर्वपातकैः ॥ ५ ॥ ॥ ऋषयऊचुः ॥ ॥ सूतसूतमहाप्राज्ञसर्वशास्त्रविशारद ॥ त्वंनोदातामहाभागज्ञानरत्न
स्यसर्वदा ॥ ६ ॥ बहूनीहपुराणानिश्रुतानिचमुखात्तव ॥ गंगायाविभवश्चापिराज्ञांचैवप्रकीर्तनम् ॥ ७ ॥ सर्वेषांदेशवर्या
णांमाहात्म्यानिमहांतिच ॥ श्रोतुमिच्छामहेत्वत्तआकेदारमतःपरम् ॥ ८ ॥ अवशिष्टानितीर्थानिमायाक्षेत्रादितःपुनः ॥
नहिवेत्तात्रिलोकेहित्वत्समोरोमहर्षण ॥ ९ ॥ ॥ सूतउवाच ॥ ॥ साधुसाधुमहाभागाःपृष्टंयन्मुनिभिःपरम् ॥ तद्वैस
म्यक्प्रवक्ष्यामिनमस्कृत्यगजाननं ॥ १० ॥ श्रुत्वावैमानसेतीर्थेतीर्थानिसुबहूनिच ॥ देवागाराणिबहुशःकथाश्चमुनिसत्त
माः ॥ ११ ॥ पुनःपप्रच्छवैधात्रोगुरुंसर्वेश्वरात्मजम् ॥ विनयावनतोभूत्वाचरणावभिवाद्यच ॥ १२ ॥ ॥ नारदउवाच ॥
देवषण्मुखदेवेशपार्वतीसुतनायक ॥ मानसादिषुक्षेत्रेषुतीर्थानिप्रवराणिमे ॥ १३ ॥ कथितानिमहासेनभवमुक्तिप्रदानि

तांयातिसत्वरम् ॥ १८ ॥ द्रोणतीर्थेपियःकश्चिच्छिवसंन्यस्तमानसः ॥ स्नानंदानंजपंहोमंकरोतिभक्तितत्परः ॥ १९ ॥ त
त्सर्वंकोटिगुणितंभवत्येवनसंशयः ॥ रामतीर्थेऽपियःकश्चित्स्नानंवैप्रकरोतिहि ॥ २० ॥ सयातिशिवलोकेहियावदिंद्राश्च
तुर्दश ॥ हृषीकेशेतुयःकश्चिद्ब्रह्मतीर्थेसुपुण्यदे ॥ २१ ॥ दृष्ट्वाश्रीभरतंदेवंस्नातिवैभक्तितत्परः ॥ मुक्तिभागीभवेत्सद्योनरना
थोभवत्यपि ॥ २२ ॥ एकरात्रमपिस्थित्वानारायणसमोभवेत् ॥ यमुनापिमहाभागातत्रायातिसरिद्वरा ॥ २३ ॥ तत्संगमे
महातीर्थंप्रयागात्कोटिसंख्यकम् ॥ धन्यानांमानुषंजन्मतत्रभारतखंडके ॥ २४ ॥ तत्रापिहिमवद्देशेमायाक्षेत्रेविशेषतः ॥
तत्रापिब्राह्मणेवंशेतत्रापिमज्जतांकुले ॥ २५ ॥ यस्तीर्थस्नानमात्रेणकृतकृत्योभवेन्नरः ॥ मानुषंजन्मसंप्राप्यतेनैवसुकृतंकृ
तम् ॥ २६ ॥ हृषीकेशाश्रमेपुण्येगच्छंतिसुधियश्चये ॥ हसंतिपितरस्तेषांसर्वेवैमुक्तिलालसाः ॥ २७ ॥ अन्यान्यपिचती
र्थानिवर्तंतेसुबहून्यपि ॥ यानिस्मृत्वाचपापेभ्योमुच्यतेनात्रसंशयः ॥ २८ ॥ तपोवनंसमासाद्यकुर्वंतिश्राद्धमुत्तमम् ॥ तेषां
वैपितरःस्वर्गेनित्यंतृप्ताभवंतिहि ॥ २९ ॥ एतदेवमहाक्षेत्रंमुक्तिद्वारमपावृतम् ॥ लक्ष्मणस्थानमासाद्यलक्ष्मणंप्रणमंति
ये ॥ ३० ॥ तेवैरघुवरश्रेष्ठाभाग्यवंतोभवंतिहि ॥ सौमित्रतीर्थकेस्नात्वावाजपेयफलंलभेत् ॥ ३१ ॥ ततोवैशिवतीर्थेऽस्मि ॥ ३ ॥
न्स्नांतियेभक्तितत्पराः ॥ शिवस्थानंप्राप्नुवंतिब्रह्मस्थानेविशेषतः ॥ ३२ ॥ एतदेवमहाक्षेत्रंश्रेष्ठंप्राहसदाशिवः ॥ मनसा

पिचयोमर्त्योवचसापितथैवच ॥ ३३ ॥ कृतकृत्योभवेन्मर्त्योमायाक्षेत्रस्यदर्शनात् ॥ अस्मिन्क्षेत्रेमृतःकश्चिद्ब्रह्मयातिनसंश
यः ॥ ३४ ॥ देवाअपिमहात्मानोनित्यंवैमुक्तिलालसाः ॥ इच्छंत्यस्मिन्स्थलेरम्येजन्मापिहिनसंशयः ॥ ३५ ॥ मुनयःसि
द्धगंधर्वायक्षकिन्नरतापसाः ॥ नित्यंवसंतिविप्रेंद्रनारायणपरायणाः ॥ ३६ ॥ चतुर्वेदमयोघोषस्त्रिसंध्यंजायतेद्विज ॥ इति
तेकथितंसर्वंयत्पृष्टोऽहंत्वयाद्विज ॥ ३७ ॥ तीर्थानिप्रवराण्येवकिमन्यच्छ्रोतुमिच्छसि ॥ ॥ सूतउवाच ॥ ॥ इतिश्रुत्वा
वचस्तस्यमुनिःपरमपावनम् ॥ पुनःपप्रच्छदेवेशपुत्रंविस्तरपूर्वकम् ॥ ३८ ॥ इतिश्रीस्कंदपुराणेकेदारखंडेमायाक्षेत्रमा
हात्म्येद्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ श्रोतुमिच्छामिक्षेत्रस्यमायायाःपुण्यवर्द्धनम् ॥ उत्पत्तिंविस्तरेणैवप्रपन्नोभक्तितत्परः ॥ १ ॥ ॥
॥ स्कंदउवाच ॥ ॥ शृणुनारदवक्ष्यामिपापघ्नंसर्वकामदम् ॥ यथापुराभवद्यज्ञोदक्षस्यात्रप्रजापतेः ॥ २ ॥ पुरादक्षोमहा
तेजाःप्रजानांपतिषुवरः ॥ बभूवात्यंतकुशलःसर्वशास्त्रेषुवैद्विजः ॥ ३ ॥ योवैपुराहिविप्रेंद्रदक्षोंगुष्ठाद्व्यजायत ॥ श्रीब्रह्म
णोभगवतःसृष्टिकर्मोद्यतस्यहि ॥ ४ ॥ कन्याबभूवुस्तस्यापिब्रह्मसंततिकारणाः ॥ एकादशमुनिःपूर्वंयज्ञायकृतवान्मतिं ॥
॥ ५ ॥ आगताश्चततःसर्वेसदेवासुरमानुषाः ॥ दर्शनार्थंहियज्ञस्यदक्षस्याद्भुतकर्मणः ॥ ६ ॥ मुनयःकुशहस्ताश्चसोत्तरी

मा०क्षे० याजिनांवराः ॥ वसिष्ठादयोमहात्मानोदंडपुस्तकधारकाः ॥ ७ ॥ शिष्योपशिष्यैर्युक्ताश्चनानाशास्त्रविशारदाः ॥ पुल मा०अ०
॥ ४ ॥ स्त्यश्चमहाभागःपुलहःक्रतुरंगिराः ॥ ८ ॥ एतेचान्येचबहवोमुनयःसमुपागताः ॥ विश्वेदेवास्तथादित्यामरुतोयक्षकिन्नराः ३
॥ ९ ॥ साध्याःसिद्धा महात्मानः सेंद्राःसुरगणास्तथा ॥ विष्णुश्चभगवान्ब्रह्माचंद्रमाश्चबृहस्पतिः ॥ १० ॥ गानंचक्रु
श्चगंधर्वाःकिन्नराश्चतथैवच ॥ ननृतुश्चाप्सरोगणानानागानविशारदाः ॥ ११ ॥ आनकाःपटहाढक्कास्तथादुंदुभिपंक्तयः ॥
नेदुश्चसर्वतोविप्रपुष्पाणिववृषुश्चखात् ॥ २१ ॥ महानेवसमाजोभूत्सर्वेषांभगवत्प्रियः ॥ तेषांमध्यगतोदक्षःसुतरांशोभते
मुने ॥ १३ ॥ समारेभेततोयज्ञंमुनिभिर्ब्रह्मवादिभिः ॥ बभूवचततोहर्षोमहानेवमहात्मनः ॥ १४ ॥ सर्वास्तद्दुहिताविप्र
निष्ककंठ्योमहामते ॥ आगताःसर्वतोदिग्भ्योदिव्याभरणभूषिताः ॥ १५ ॥ वदतांखेचराणांतुमुखेभ्यश्चतयाश्रुतम् ॥
श्रुत्वायज्ञंपितुर्विप्रदक्षस्यनियतात्मनः ॥ १६ ॥ तदुपश्रुत्यसहसासतीवैपितृवत्सला ॥ आगंतुंहिमनश्चक्रेनानामुनिविरा
जिते ॥ १७ ॥ व्रजंतिसर्वतोदिग्भ्योगंधर्ववरनायकाः ॥ विमानेषुस्थिताश्चैवसर्वाभरणभूषिताः ॥ १८ ॥ अंबरंशोभि
तंदृष्ट्वाविमानैःसर्वतोदिशं ॥ उवाचश्रीमहादेवंनानागणसुसेवितम् ॥ १९ ॥ ॥ सत्युवाच ॥ ॥ भगवन्परमेशानअंब ॥ ४ ॥
रंपर्यलंकृतम् ॥ नूनंममपितुर्गेहेवर्ततेसुमहोत्सवः ॥ २० ॥ द्रष्टुंतदुत्सवंदेवमनोमेत्वरयत्यलम् ॥ सर्वाभगिन्योमेदेवभ

दानिहि ॥ यानिज्ञात्वैवसद्योहिमुक्तिभाग्भवतिस्फुटम् ॥ ४ ॥ गंगाद्वाराच्छृणुप्राज्ञरत्नस्तंभावधिंब्रुवे ॥ तथानंदागिरेःप
श्चात्काष्ठांतंब्रह्मनंदन ॥ ५ ॥ मायाक्षेत्रंसमाख्यातंगंगाद्वारेसुपुण्यदे ॥ ब्रह्मणःस्थानतोयावद्योजनानिदशद्वयम् ॥ ६ ॥
प्रमाणंक्षेत्रराजस्यगदितंब्रह्मपुत्रक ॥ तत्क्षेत्रदक्षिणेभागेद्रोणाश्रमइतीरितः ॥ ७ ॥ गंगायमुनयोर्मध्येअष्टयोजनविस्तृ
तः ॥ तिर्यग्विस्तारएवास्ययोजनत्रयमीरितः ॥ ८ ॥ ॥ नारदउवाच ॥ ॥ मायाक्षेत्रंहियत्प्रोक्तंत्वयाद्वादशयोजनम्
तद्ब्रूहिप्रथमंदेवविस्तरेणममप्रभो ॥ ९ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुनारदवक्ष्यामिमायाक्षेत्रंसुपुण्यदम् ॥ तस्योत्पत्तिं
चमाहात्म्यंश्रृणुष्वैकमनाहिमे ॥ १० ॥ मायाभगवतीसाक्षात्सृष्टिस्थित्यंतकारिणी ॥ तत्क्षेत्रंहिसमाख्यातंभवमुक्तिप्रदा
यकम् ॥ ११ ॥ पुरादक्षोमहातेजाब्रह्मपुत्रोमुनीश्वर ॥ तस्येयंदुहिताविप्रसतीनाम्नीमनोहरा ॥ १२ ॥ यस्याःस्मरणमा
त्रेणसर्वदुःखैःप्रमुच्यते ॥ ययासर्वमिदंव्याप्तंजगद्वैसचराचरम् ॥ १३ ॥ तत्क्षेत्रदर्शनात्सद्योनचभूयोभिजायते ॥ येनदृष्ट
मिदंक्षेत्रंसफलंतस्यजीवितम् ॥ १४ ॥ गंगाद्वारेकुशावर्तेबिल्वकेनीलपर्वते ॥ स्नात्वाकनखलेतीर्थेपुनर्जन्मनविद्यते ॥ १५ ॥
सर्वेदेवाःसगंधर्वायक्षकिन्नरतापसाः ॥ तिष्ठंतियत्रतीर्थेहिसर्वेतेमुक्तिलालसाः ॥ १६ ॥ चंडिकातीर्थराजेहिसकृत्स्नातोम
हामुने ॥ सधन्यःपुरुषोलोकेसफलंतस्यजीवितम् ॥ १७ ॥ दक्षेश्वरंमहादेवंदृष्ट्वावैभक्तितत्परः ॥ कृतकृत्योभवेन्मर्त्योधन

इतिश्रुत्वानिगदितंदेव्योक्तंभगवान्शिवः ॥ विमनस्कांमहेशानींभवानींप्रत्यभाषत ॥ ३६ ॥ ॥ श्रीशिवउवाच ॥ ॥
देविगच्छपितुर्गेहेयदितेआग्रहःखलु ॥ यज्ञस्थदर्शनार्थायभाव्यस्योत्पत्तिहेतवे ॥ ३७ ॥ ॥ कार्तिकेयउवाच ॥ ॥
इत्याज्ञांशिरसाधृत्वाचरणावभिवाद्यच ॥ ययौसादक्षगेहेतुद्रष्टुंयज्ञमहोत्सवम् ॥ ३८ ॥ तत्रगत्वामहामायाददर्शमुनिसत्त
मान् ॥ कुशपाणीन्महासत्त्वान्मृगचर्मांबरांस्तथा ॥ ३९ ॥ सेंद्रान्सुरगणान्यक्षान्गंधर्वान्किन्नरांस्तथा ॥ विश्वेदेवांश्चम
रुतःसाध्यान्सिद्धांस्तथापरान् ॥४०॥ भागान्ददर्शसर्वेषांदेवानांदक्षपुत्रिका ॥ भर्तुर्भागमनालक्ष्यपप्रच्छपितरंसती ॥ ४१
॥ ॥ श्रीदेव्युवाच ॥ ॥ भोभोःपितर्महाभागसर्वेदेवासमागताः ॥ सभागाएवतेसर्वेभर्तुर्भागःकथंनहि ॥ ४२ ॥ जा
मातरश्चभवतःसर्वेएवागताःखलु ॥ भर्ताममापिहेतातजामातास्तिमहामते ॥ ४३ ॥ कथंनाकारितोदेवोभवोभावविव
र्जितः ॥ एतन्मेसंशयंछिंधियथान्याश्चतथाप्यहम् ॥ ४४ ॥ ॥ स्कंदउवाच ॥ ॥ निशम्यवचनंतस्याभवान्याःस
प्रजापतिः ॥ प्रहस्यब्रह्मपुत्रस्तुबभाषेवचनंशिवाम् ॥ ४५ ॥ ॥ दक्षउवाच ॥ ॥ तस्यैवभूतवेतालाःपिशाचाःशावका
गणाः ॥ सहायास्तस्यरूपंहिविकरालंमहेश्वरि ॥ ४६ ॥ भस्मनोधारणंयस्यविषस्यअशनंकिल ॥ करिचर्मपरीधानंस ॥५॥
र्पाश्चैवविभूषणम् ॥ ४७ ॥ अधिकांगश्चदुहितर्हीनांगश्चतथाभवः ॥ देवेतरोमहाकालःसर्वेषांनाशकश्चसः ॥ ४८ ॥ भक्ष्य

भूषितः

पात्रंकपालंचनृमुंडैर्मंडितोहरः ॥ वृषारूढःशूलपाणिःपाशहस्तोनिरीश्वरः ॥ ४९ ॥ अकस्मान्नृत्यतेऽकस्माद्धसतेजृंभतेपुनः
॥ अंकिनंशिरसाधत्तेपुरदाहकरःपरः ॥ ५० ॥ कंकालविलसद्भूतिःश्मशानभस्मलेपनः ॥ अनार्य्योऽनार्यसंगश्चवंचकोविद्य
यायुतः ॥ ५१ ॥ एतादृशोमहेशानिभर्तावैतवशंकरः ॥ अमंगलोमंगलेस्मिन्भागभागीकथंभवेत् ॥ ५२ ॥ योग्यानामेव
हेपुत्रिसमाजोस्तिमखेमम ॥ अमंगलस्यतेभर्तुः क्रतुदर्शनंकिंशिवे ॥ ५३ ॥ नार्हतियज्ञसदसियोगिमानंसपुत्रिके ॥ द
त्तासिदैवयोगेनमयापापेनतस्यवै ॥ ५४ ॥ ॥ कार्तिकेयउवाच ॥ ॥ इतिश्रुत्वावचस्तस्यभर्तुर्निंदात्मकंमुने ॥ कोपेना
रक्तवर्णासासाश्रुनेत्राबभूवह ॥ ५५ ॥ सर्वेषांपश्यतामेवसदेवासुररक्षसाम् ॥ मनस्याधायचरणौभर्तुःश्रीपरमात्मनः
॥ ५६ ॥ पपातसहसावह्नौज्वलितेधातृपुत्रक ॥ हाहाकारोमहानासीत्सर्वेषांदेवरक्षसाम् ॥ ५७ ॥ ततःसविस्मयाविष्टो
दक्षोनामप्रजापतिः ॥ नकिंचिदुक्तवान्विप्रदृष्ट्वातत्पुत्रिचेष्टितम् ॥ ५८ ॥ इतिश्रीस्कंदपुराणेकेदारखंडेमायाक्षेत्रमाहात्म्ये
सतीदेहोत्सर्गोनामतृतीयोध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ स्कंदउवाच ॥ ॥ श्रुत्वातत्पतनंविप्रभार्यायाजातवेदसि ॥ क्रोधामर्षविवृत्ताक्षआययौभगवाञ्छिवः ॥ १ ॥ नैकशस्त्र
प्रहरणाअद्भुतास्याभयानकाः ॥ केचित्पाषाणहस्ताश्चकेचिद्वृक्षसहस्तकाः ॥ २ ॥ एकपादाऊर्ध्वकेशाःश्यामांगालोहिता

ननाः ॥ घोटकास्याश्चकेचिद्विकेचिन्मार्जाररूपकाः ॥ ३ ॥ केचिदंजनकूटाभाःकेचिद्भस्मविलेपनाः॥कबंधाश्चतथाकेचिदेक
हस्तास्तथापरे ॥ ४ ॥ सिंहव्याघ्राननाःकेचित्कूर्मास्यालंबकर्णकाः ॥ लंबस्तनाश्चकेचित्तुतथालंबशिरोरुहाः ॥ ५ ॥ दीर्घ
ग्रीवादीर्घनखादीर्घास्यादीर्घनासिकाः ॥ दीर्घदंतादीर्घदेहादीर्घांबरसमावृताः ॥ ६ ॥ नंदीभृंगीरिटिःस्तुंडीप्रेतास्योवज्र
नाभकः ॥ कुवलयाश्वोश्वकर्णश्चनिर्मुंडोमस्तकारुणः ॥ ७ ॥ पुष्पदंतोबृहद्भानुरमिताश्वोश्ववाहनः ॥ तुंडिकोढुंडिकश्चैव
कालनामातथैवच ॥ ८ ॥ असुरांतोजनाल्हादोल्हादकोयामिकस्तथा ॥ चंडकोंतककारश्चचंद्रराजोनिशाचरः ॥ ९ ॥ ए
तेचान्येचबहवोगणाःशर्वस्यहेमुने ॥ कोटीनांशतकोट्यश्चतथायुतशतानिच ॥ १० ॥ आजग्मुःसहसातेनश्रीशिवेनमहा
त्मना ॥ संप्रेषिताश्चतेसर्वेधावंतःसर्वतोदिशम् ॥ ११ ॥ कैलासादवतीर्णास्तेनृत्यंतश्चतथापरे ॥ कुर्वंतश्चमहाशब्दमट्टहा
संतथापरे ॥ १२ ॥ तत्रसुःसर्वभूतानिसमुद्राश्चचकंपिरे ॥ चकंपेवसुधाविप्रप्रचंडातिमिराहता ॥ १३ ॥ शिवोपितत्रास्ति
नृमुंडमालीक्रुद्धःस्फुरन्नेत्रकरालवह्निः ॥ त्रिशूलहस्तोहरिचर्मशोभितःप्रदष्टदंष्ट्रौष्ठपुटःकरालः ॥ १४ ॥ सधूर्जटिःकालक
रालरूपोभयंकरोभीममुखाहियुक्तः ॥ वमद्विषज्वालभुजंगमोसौतडित्प्रभाभासुरनेत्रकांतिः ॥ १५ ॥ उत्थायरुद्रःसहसाह
सन्सन्गंभीरघोषोजगदीश्वरःशिवः ॥ ससर्जभूमौपुरुषंमहांतंसहस्रबाहुंवपुषादिवंगतम् ॥ १६ ॥ त्रिसूर्यदृष्टिंघनरुक्प्र

वेयुरागताःखलु ॥ २१ ॥ श्रुत्वोत्सवंपितुर्गेहेगेहेतिष्ठतियासुता ॥ कथंवैकीदृशंतस्याहृदयंसुरवंदित ॥ २२ ॥ कदाद्रक्ष्या
मिपितरंमुनिभिःसमुपासितं ॥ भगिनीश्चमहादेवमातरंचकदापुनः ॥ २३ ॥ इतिमेहृदयेदेववर्ततेऽहर्निशंप्रभो ॥ देह्याज्ञांम
मदेवेशयथायास्यामितत्रहि ॥ २४ ॥ ॥ श्रीशिवउवाच ॥ ॥ अनाहूताकथंदेविपितुर्गेहेममःशुभे ॥ कथमुत्सहतेते
द्यनिष्ठुरस्यप्रजापतेः ॥ २५ ॥ यथामन्येतयोदेविआत्मानंसततंप्रिये ॥ तमपिप्रभवेमन्यादितिप्राहुःपुरातनाः ॥ २६ ॥ स
र्वेणापिविशेषेणआहूतोनितरांव्रजेत् ॥ यदिगच्छेदनाहूतोलघुतांयातिमानदे ॥ २७ ॥ मित्रंस्वच्छतयाविंद्यात्समंसम
तयातथा ॥ विद्वेषणेनशत्रुंवैइतिप्राहुर्मनीषिणः ॥ २८ ॥ ऐश्वर्यमदसंयुक्तंत्यजेन्मित्रंपलालवत् ॥ पितरंवापिपुत्रंवाभ्रात
रंवापिदक्षजे ॥ २९ ॥ ऐश्वर्यमदसंयुक्तमहंकारपरायणं ॥ यदिगच्छेदनाहूतोहास्यतांयातिसत्वरं ॥ ३० ॥ मूर्खाविचूर्ण
यंत्येतेदृष्ट्वातंगृहमागतम् ॥ यस्तुगच्छेदनाहूतोजायतेमाननाशनम् ॥ ३१ ॥ ॥ श्रीदेव्युवाच ॥ ॥ सम्यगुक्तंहिभ
गवंस्त्वयादेवमहेश्वर ॥ नपितानतथाभ्रातानसंतिमित्रबांधवाः ॥ ३२ ॥ केनशक्यंतवेशस्यमोहोवैसंभविष्यति ॥ भूष
णंतवसर्पावैअशनंनहिविद्यते ॥ ३३ ॥ निर्गुणोसिमहेशानमाययारहितश्चसः ॥ कथंमित्रंभवेद्देवतवसंसारनायक ॥ ३४ ॥
किमपेक्षातवेशानभवेत्कस्यापिकालिका ॥ धारणमस्मनोदेवपात्रंथस्यकपालकम् ॥ ३५ ॥ ॥ कार्तिकेयउवाच ॥ ॥

मा०क्षे० किन्नरगुह्यकाः ॥ विश्वेदेवाश्चपितरोगुह्यकाउरगाःखगाः ॥ ३० ॥ मुनयोमानुषाश्चैवतथान्येतच्छरीरजाः ॥ ऐरावतंसमा मा०अ०
॥७॥ रुह्यवासवोऽपिसमाययौ ॥ ३१ ॥ नानादेवगणैःसार्द्धंदक्षसाहाय्यकारकाः ॥ नानाशस्त्रप्रहरणायुद्धायकृतनिश्चयाः ॥ ४
॥ ३२ ॥ यज्ञस्याविघ्नकर्तारःसंदष्टौष्ठपुटाश्चते ॥ कुर्वंतस्तूर्यघोषांश्चतथाशंखरवान्द्विजः ॥ ३३ ॥ तेपिप्रमथनाथाश्च
चक्रुःकोलाहलंपरम् ॥ घंटाशतानिनादंतःशिवोजयतिसर्वदा ॥ ३४ ॥ इतीरयंतःसुगिरोनानापर्वतशोभिताः ॥ चक्रुः
परस्परंयुद्धंरोमहर्षणकारकम् ॥ ३५ ॥ देवगणाःशिवगणाःसंदष्टौष्ठपुटास्तथा ॥ छिंधिछिंधीतिशब्दांश्चभिंदिभिंदित
थैवच ॥ ३६ ॥ हनहनमहादुष्टंतिष्ठतिष्ठेतिचासकृत् ॥ वदंतोयुयुधुर्देवास्तथाप्रमथसत्तमाः ॥ ३७ ॥ पाषाणैःपर्वतैःके
चिन्निगडैश्चतथापरे ॥ त्रिशूलैःपट्टिशैःखड्गैस्तोमरैःशक्तिभिस्तथा ॥ ३८ ॥ एवंपरस्परंयुद्धंचक्रुर्देवगणास्तथा ॥ नरा
त्रिर्नैवदिवसोनसंध्याचतथैवहि ॥ ३९ ॥ नोव्यजंतेतदाविप्रतस्मिंस्तमसिदारुणे ॥ सोपिवैकालपुरुषोननर्तचरणांगणे
॥ ४० ॥ अट्टहासंतथाचक्रेनेत्रज्वालासमावृतः ॥ तस्यशब्देनसर्वेषांव्याकुलंचाभवन्मनः ॥ ४१ ॥ तंदृष्ट्वादुद्रुवुर्दे
वाःसिद्धगंधर्वसत्तमाः ॥ दृष्ट्वातदाद्रवतस्तांश्छक्रस्त्रिभुवनेश्वरः ॥ ४२ ॥ प्रोवाचसर्वसैन्यानिगजराजोपरिस्थितः ॥ ॥७॥
आश्चर्यमतुलंमत्वादृष्ट्वातद्रणचेष्टितम् ॥ ४३ ॥ ॥ इंद्रउवाच ॥ ॥ रेरेदेवगणाःसर्वेनिवर्त्तध्वमशंकिताः ॥ युद्धं

कुरुतमाभैष्टप्रमथैःसहसंयुगे ॥ ४४ ॥ ॥ स्कंदउवाच ॥ ॥ इंद्रस्यवचनंश्रुत्वासर्वेदेवामहामते ॥ नानाशस्त्रप्रहर
णायुद्धायविनिवर्तिताः ॥ ४५ ॥ ततोबभूवतुमुलंयुद्धंवैरोमहर्षणम् ॥ देवानांप्रमथानांचमहत्सर्वत्रकोपनम् ॥ ४६ ॥ अ
र्दयंतिस्मसकलान्महादेवगणांस्ततः ॥ इतस्ततश्चधावंतोविनेशूरुधिरोक्षिताः ॥ ४७ ॥ एकबाह्वक्षिचरणानिपेतुर्धरणी
तले ॥ हाहाकाररवांश्चैवकुर्वंतोनितरांगणाः ॥ ४८ ॥ एतस्मिन्नंतरेदेवोमहादेवसमुद्भवः ॥ चकारघंटानिनदंदृष्ट्वातान्पीडि
तान्भृशम् ॥ ४९ ॥ ततस्तेपार्षदाःसर्वेसमुत्तस्थुर्महीतलात् ॥ निरामयानिरातंकाद्विगुणंबलमाश्रिताः ॥ ५० ॥ चक्रुःको
लाहलंशब्दंप्रदष्टौष्ठपुटाःपुनः ॥ युयुधुर्देवसंघैश्चपाषाणैःपर्वतैर्भृशम् ॥ ५१ ॥ अर्दयामासुरसुरान्देवादीन्वासवोदितान्
॥ तयोश्चसैन्ययोर्मध्येजातोवैरुधिरार्णवः ॥ ५२ ॥ उत्पेतुर्गगनेतूर्णंमहादेवगणास्ततः ॥ आकाशंछादयामासुःकृतांतइव
कोपिताः ॥ ५३ ॥ निपेतुर्यज्ञसदनंयत्रदेवाःसवासवाः ॥ प्राग्वंशंप्रमथाःकेचिद्बभंजुःकुपिताभृशम् ॥ ५४ ॥ पत्नीशालां
तथाकेचित्केचिदाग्नीध्रकांस्तथा ॥ महानसंतुकेचित्तुचूर्णयामासुरुत्तमाः ॥ ५५ ॥ रुरुधुर्यज्ञपात्राणितद्विहारांस्तथापरे ॥
अग्नीन्वैनाशयामासुर्बिभिदुर्वेदिकांतथा ॥ ५६ ॥ कुंडेष्वमूत्रयन्केचिद्विष्ठांचक्रुस्तथापरे ॥ मुनीनांचतथापत्नीरेकेवाग्भिर
तर्जयन् ॥ ५७ ॥ केचिद्द्विजगृहेदेवानासन्नांश्चपलायितान् ॥ मणिमान्नामविप्रर्षेबबंधभृगुमंजसा ॥ ५८ ॥ वीरभद्रोऽपि

 दक्षंचचंडीशःपूषणंतथा ॥ नंदीश्वरोग्रहीद्विप्रभवोनाममहाबलम् ॥ ५९ ॥ सर्वास्तानृत्विजोदेवसदस्यान्सदिवौकसः ॥ अ
र्दयामासुरुग्रास्तेग्रावभिर्मुष्टिभिस्तथा ॥ ६० ॥ तांस्तेतथाविधान्दृष्ट्वाशेषास्तेप्राद्रवन्दिशः ॥ सदस्यादायसर्वेषांमणि
मान्नामनामतः ॥ ६१ ॥ भृगोःश्मश्रूणिसहसालुलुंचप्रहसन्निव ॥ पातितस्यभगस्याशुनेत्रेवैउज्जहारसः ॥ ६२ ॥ नंदीश्वरो
महादेवगणोवैविप्रसत्तम ॥ चंडीशोऽपातयद्दंतान्पूष्णश्चैवमहामते ॥ ६३ ॥ शप्यमानंमहादेवंदंतांश्चादर्शयत्खलु ॥ वीरभ
द्रोमहानादोदक्षस्योरसिहेतिना ॥ ६४ ॥ आक्रम्यसहसापद्भ्यांछिंदन्नपिमहेश्वरः ॥ तदुद्भूतैर्हिशस्त्रैश्चसमंत्रैरपितत्वतः ॥
॥ ६५ ॥ अभिदत्सतदादेवोवीरभद्रोमहागणः ॥ विस्मयंपरमंलेभेदध्यौपशुपतिंचिरम् ॥ ६६ ॥ दृष्ट्वासांतपनंयोगंमखेत
स्यप्रजापतेः ॥ तेनासौवीरभद्रस्तुयजमानपशोःशिरः ॥ ६७ ॥ कायात्समाहरच्छीघ्रंदर्शयन्हस्तलाघवम् ॥ साधुवादो
महानासीत्प्रमथानांमहात्मनाम् ॥ ६८ ॥ हाहाकाररवश्चासीदन्येषांचमुनीश्वर ॥ अग्नौजुहावतच्छीर्षंदक्षिणाग्नावमर्षतः
॥ ६९ ॥ आश्चर्यमयमत्युग्रंसर्वेषांचभयानकम् ॥ एतत्कृत्वामहादेवःप्रतस्थेगिरिनायकम् ॥ ७० ॥ इतिश्रीस्कंदपुराणेके
दारखंडेमायाक्षेत्रमाहात्म्येचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ स्कंदउवाच ॥ ॥ अथसर्वेदेवगणाःप्रमथैश्चपराजिताः ॥ शस्त्रैर्निकृत्तसर्वांगाऋत्विग्भिःसहितास्तथा ॥ १ ॥ सदस्या

काशंकरालदंष्ट्रंज्वलदग्निमूर्द्धजम् ॥ नृमुंडमालंविविधोद्यतायुधंददर्शदेवोभुविअग्रतःस्थितम् ॥ १७ ॥ सप्रत्युवाचाथम
हेश्वरंतंकिंकर्मकर्तुंस्मरणंममाद्य ॥ गृणंतमित्येवमहोमहेशःसमादिशत्कार्यमितिस्फुटंतम् ॥ १८ ॥ ॥ श्रीरुद्रउवाच ॥
दक्षंजहिसयज्ञंहित्वमेवप्रमथाग्रणीः ॥ पुरुषोसिमहांस्त्वंहिनहित्वत्सदृशात्परः ॥ १९ ॥ ॥ स्कंदउवाच ॥ ॥ इत्याज्ञ
प्तःशिवेनास्तौश्रीशिवंपरिचक्रमे ॥ नमस्कृत्वाचपुरुषोययौप्रमथसंवृतः ॥ २० ॥ नदंतश्चप्लवंतश्चहसंतःप्रमथागणाः ॥ अ
ग्रेकृत्वातुतंदेवदेवजंकृष्णपिंगलम् ॥ २१ ॥ उद्यम्यशूलंसहसाजगत्संहारकारकम् ॥ प्राद्रवच्छिवसेनानीर्महाकालइवांत
कः ॥ २२ ॥ दृष्ट्वातदद्भुतंसर्वेउदीच्यांरजउत्थितम् ॥ ऊचुःपरस्परंयज्ञेसदस्याऋत्विजश्चते ॥ २३ ॥ किमिदंकिमिदंजातंके
चिद्ध्यानपरास्थिताः ॥ जाताश्चविस्मयाविष्टाद्विजपत्न्यश्चतेद्विजाः ॥ २४ ॥ वातानवांतिप्रथमंकथंकल्पउपस्थितः ॥ दस्य
वोवाभविष्यंतिकुतःप्राचीनबर्हिषः ॥ २५ ॥ अहोअहाहाकिमिदंप्रलयःसमुपस्थितः ॥ किंकर्तव्यमतोऽस्माकंकुत्रवागम्य
तांत्वरम् ॥ २६ ॥ ॥ स्कंदउवाच ॥ ॥ ततोददर्शपुरुषंशूलाग्रग्रथितेभकम् ॥ गर्जंतंसर्वसैन्यानिद्रावंतंमुनिवंदितम् ॥
॥ २७ ॥ उवाचतान्देवगणान्साध्यांश्चमरुतोगणान् ॥ सज्जीभवथयुद्धायनानाशस्त्रविशारदाः ॥ २८ ॥ ॥ स्कंदउवाच ॥
इतिश्रुत्वावचस्तस्यदक्षस्यकुपितस्यहि ॥ उत्तस्थुःसर्वतोदैत्यायुद्धायकृतनिश्चयाः ॥ २९ ॥ आदित्यावसवोदेवाःसाध्याः

प्रिययारहितंदेवंसर्वज्ञंपरमेश्वरम् ॥ त्रिनेत्रंपरितोविप्रसिद्धचारणसेवितम् ॥ १६ ॥ सनकाद्यैर्महाभक्तैःस्तूयमानंविभुंसु
राः ॥ चिंतयंतंसतींदेवींसर्वज्ञंपरमेश्वरम् ॥ १७ ॥ दृष्ट्वाशिवंराजमानंकैलासाद्रिमिवापरम् ॥ भक्त्यागद्गदयावाचाब्रह्मा
स्तोतुंप्रचक्रमे ॥ १८ ॥ ॥ब्रह्मोवाच॥ ॥ नमोनमस्तेशतशोनमस्तेविभोत्रिनेत्रारिनिषूदनप्रभो ॥ त्वमेवपातासुरमा
नवानांत्वमेवहर्तानयनाग्निनामृड ॥ १९ ॥ नचादिरंतर्नचरूपमस्तितेत्वमेवहेनाथसुरादिकारणम् ॥ वयंहिहेदेववरप्रभो
भोःसंमोहितास्तेजगदात्मशक्त्या ॥ २० ॥ नविघ्नहेतंभवतोभवेशरूपंनभेदंकिलसर्वमध्ये ॥ अहंहिजानेनितरामिदानींस
र्वस्यविश्वस्यपरंनिदानम् ॥ २१ ॥ शिवस्यशक्तेश्चपरंतुयद्वैतद्वैभवानादिजनिर्महेश ॥ भिन्नश्चशक्त्यानभवान्यतोवैत्वत्सं
गतोमाजगदात्मशक्तिः ॥ २२ ॥ सर्वंसृजत्यत्तिवदंतिसर्वेयेषांमनस्त्वच्चरणारविंदे ॥ पुनस्त्वमेवाखिललोकपालकोमायागु
णप्रेरणयामहेश्वर ॥ २३ ॥ त्वमेवचाग्रेनिधनप्रकारकोभवस्यभिन्नोभगवान्महेश्वरः ॥ त्वमेवधर्मार्थसुखप्रवर्तकोयज्ञोभवा
न्सर्वगतस्त्वमेकः ॥ २४ ॥ त्वयैवदेवेशभवेशसेतवोधर्मस्यतत्त्वस्यकृताःपुरातनाः ॥ यद्वैपरब्रह्ममहेशयोगिनोध्यायंतितत्त्वा
र्थविदोक्षरंपरम् ॥ २५ ॥ निर्लेपकंज्योतिरमेयमीश्वरंतद्वैभवान्भावितसर्वजीवकः ॥ सत्कर्मणांकर्मभवान्भवाकरसुमंगलं ॥ ९ ॥
यद्भुविमंगलानाम् ॥ २६ ॥ तेजःपरंयद्रविपूर्वकाणांत्वमेवयद्वैयदकिंचिदस्ति ॥ सद्बुद्धिदाताभगवान्महेश्वरःकुर्बांद्वदरत्वं

भवबंधकारणम् ॥ यद्वैजगत्यांक्रियतेहिजंतुभिःसर्वस्यबीजंजगदाकरःप्रभो ॥ २७ ॥ दक्षेणयद्वैकृतमाननाशनंसमस्यतेस
र्वसुहृत्सुधीभिः ॥ नजायतेवैमहतांभवादृशांमानस्यभंगःकुकृतोमहेश्वर ॥ २८ ॥ क्षमस्वदक्षस्यकृतापराधंरक्षस्वलोकान्स्व
कृतानकाले ॥ त्वयंविभोदेववरत्रिनेत्ररमेशगच्छंतितरांहिसर्वे ॥ २९ ॥ ॥स्कंदउवाच॥ ॥इतिस्तुतोवैभगवान्पुरारिर्धा
त्रासुबद्धांजलिनामुनीश ॥ मुनीश्वरावैप्रणतार्तिनाशकंमहेश्वरंतुष्टवुरामहेंद्राः ॥ ३० ॥ ॥मुनिगणाऊचुः॥ ॥ क्षमस्वहेना
थदुरात्मभिःकृतंमहेशनानाविधमप्यशेषकम् ॥ यद्वापराधंतवभागनाशनंरक्षस्वसर्वाणिजगंतिनायक ॥ ३१ ॥ नमस्तस्मै
महेशायनमस्तस्मैहिभूभृते ॥ नमस्तस्मैनिरीशायनमस्तस्मैसुबाहवे ॥ ३२ ॥ नमस्तस्मैत्रिनेत्रायनमस्तस्मैविबाहवे ॥ न
मस्तस्मैचगुरवेनमस्तस्मैअधावते ॥ ३३ ॥ नमस्तस्मैमहेंद्रायनमस्तस्मैहिधावते ॥ नमस्तस्मैविषयिणेनमस्तस्मैनिरा
त्मने ॥ ३४ ॥ नमस्तस्मैमहवतेनमस्तस्मैशुभात्मने ॥ नमस्तस्मैनृमुंडायनमस्तस्मैचरात्मने ॥ ३५ ॥ नमस्तस्मैभगवतेन
मस्तस्मैस्थिरात्मने ॥ नमस्तस्मैसुविभवेनमस्तस्मैशिवात्मने ॥ ३६ ॥ ॥इंद्रउवाच॥ ॥ भक्त्याभजेहंभवतोमहेशपदार
विंदंद्रुहिणाधिगम्यं ॥ यत्सेवयायातिनरोमहेशनिवृत्तमाया गुणसंप्रवाहः ॥ ३७ ॥ वंदेप्रभुंभयहरंशरणागतानांसद्धियया
निजगुरुंभवमेकमाद्यं ॥ संसेवितांघ्रिकमलंप्रमथेश्वरैस्तुनानानृमुंडकृतहस्तगणैर्महद्भिः ॥ ३८ ॥ ॥देवगणाऊचुः॥ ॥

शिवःप्रसन्नतांयातुपातुनोनिजबालकान् ॥ यएवत्रिषुलोकेषुनानाभातिजगन्मयः ॥ ३९ ॥ नमस्कुर्मोवयंदेवाःप्रसन्नाःशर
णायते ॥ अनेकसिद्धसंसेव्यरजसेप्रभवेतथा ॥ ४० ॥ रक्षनोरक्षनोदेवदह्यमानान्समंततः ॥ क्षम्यतांक्षम्यतामीशक्षमावं
तोभवादृशाः ॥४१ ॥ अस्माभिर्भगवन्देवनज्ञातोसिविमोहितैः ॥ माययातेमहादेवशिक्षेयंभवताकृता ॥४२॥ ॥ स्कंदउ०
इतिस्तुतोमहादेवोभक्तिमद्भिःसुरासुरैः ॥ प्रसन्नःसोब्रवीद्वाक्यंसर्वानिवदिवौकसः ॥४३॥ ॥ श्रीशिवउ० ॥ ॥ प्रसन्नोस्मि
वरंब्रूतसर्वेदेवाःसवासवाः ॥ मयिप्रसन्नेजगतिदुर्लभंनहिविद्यते ॥ ४४ ॥ अतःपरंमहाभागाईदृशंकर्मगर्हितम् ॥ यूयंमा
कुरुतक्षिप्रंशांतिर्भवतुवःसुराः ॥ ४५ ॥ ॥ स्कंदउवाच ॥ ॥ इतिश्रुत्वावचोदेवाहृष्टभूतास्तनूरुहाः ॥ ऊचुःप्रांजलयःसर्वे
गृणंतोदेवतागणाः ॥ ४६ ॥ ॥ देवगणाऊचुः ॥ ॥ पुनर्जीवतुदक्षोऽसौपरमात्मन्महाशय ॥ भगस्यनेत्रेभवतांपूष्णो
दंतास्तथैवच ॥ ४७ ॥ अश्विनोर्बाहवश्चैवसर्वांगादेवतागणाः ॥ यज्ञःसंपूर्णतांयातुशांतिरस्तुसदाहितु ॥ ४८ ॥ यदा
दास्यंतिवैदुष्टादुःखंस्वजनबांधवान् ॥ रक्षणीयास्त्वयादेववयंमोहविमोहिताः ॥ ४९ ॥ ॥ श्रीशंकरउवाच ॥ ॥ श्रूय
तांभोदेवगणाअपराधंनचिंतये ॥ अस्मिन्मयाविभूतीनांदंडोयंसंधृतोमया ॥ ४९ ॥ दक्षःप्रजापतिर्देवादग्धशीर्षोभवत्स ॥ १० ॥
सौ ॥ शिरसापिमुखेनाशुमत्प्रसादात्पुनःसुराः ॥ ५० ॥ भगश्चचक्षुषेक्षेतभागंत्वंबर्हिषोभगः ॥ पूषाजक्षतुदंतैश्चयजमान

श्चनिरुत्साहाःश्रीमत्प्रमथनिर्जिताः ॥ भयाकुलास्ततःसर्वेप्रणम्योचुर्महेश्वरम् ॥ २ ॥ ॥ देवाऊचुः ॥ ॥ क्षम्यतांक्षम्य
तांदेवक्षमासाराभवादृशाः ॥ यदिमन्येयुरधियांभवंतोवापराधकम् ॥ ३ ॥ उत्कृष्टतांकथंदेवभवतांप्रवरात्मनाम् ॥ वयंमा
नप्रमत्ताःस्महतोभागोभवादृशाम् ॥ ४ ॥ यत्पूज्योत्क्रमणंदेवतस्येदंकर्मणःफलम् ॥ ज्ञातोऽसित्वंमहादेवदेवानामपिदेवता
॥ ५ ॥ ॥ पुरुषउवाच ॥ ॥ यथायूयंतथाहंवैकिंकरोजगदीशितुः ॥ गच्छध्वंत्रिदशाःसर्वेकृतागसिमहेश्वरे ॥ ६ ॥ प्र
सादयध्वंभक्त्यावैविरोधंत्यज्यसत्वरम् ॥ निजक्षेमनिमित्तंहिभक्तिगम्यंमहेश्वरम् ॥ ७ ॥ ॥ स्कंदउवाच ॥ ॥ इति
श्रुत्वावचस्तस्यसर्वेदेवगणास्ततः ॥ वेपमानाभयग्रस्तास्त्राहित्राहीतिचासकृत ॥ ८ ॥ वदंतोमुनयःसिद्धाःसदस्याऋत्विज
स्तथा ॥ ब्रह्माणंवैपुरस्कृत्यसंबद्धांजलयश्चते ॥ ९ ॥ महादेवमहादेवमहादेवेतिवैपुनः ॥ गृणंतोविबुधाःसर्वेहाहाकाररवां
जातेमघे स्तथा ॥ १० ॥ कैलासंरुरुधुश्चैवसेंद्राःसर्वेदिवौकसः ॥ वनस्थलीश्चपश्यंतोहिमपुंजविमंडिताः ॥ ११ ॥ स्वर्णवृक्षास्त
थाविप्रपुंस्कोकिलविकूजिताः ॥ प्रायशोदुर्गमास्तत्रवापीस्वच्छजलाश्चताः ॥ १२ ॥ कुमदोत्पलशोभाढ्याअलिपुंजमनो
हराः ॥ नानापक्षिमृगाकीर्णानानाभिलषिताकुलाः ॥ १३ ॥ पर्वतान्परितोविप्रपश्यंतोबाह्यपादपान् ॥ जग्मुःकैलासशि
खरेनानामुनिगणान्विते ॥ १४ ॥ तत्रगत्वामहेशानंददृशुर्भूतिभूषितम् ॥ सर्पालंकारसंयुक्तंगजचर्मविभूषितम् ॥ १५ ॥

मा०क्षे० ॥ ११ ॥ वासायनमोग्निमुखतेजसे ॥६६॥ अग्निष्टोमनिवासायराजसूयनिवासिने ॥ राजराजसुसेव्यायराजराजालयस्थिते ॥६७ मा०अ०
प्रभूणांपतयेतुभ्यंनमस्तेपरमेष्ठिने॥कपर्दिनेनमस्तुभ्यंलुप्तकेशायतेनमः॥६८॥सहस्रधनुषेतुभ्यंनमस्तेगौरवर्चसे॥ भूतिभू ५
षितदेहायसर्वैश्वर्यप्रदायिने ॥ ६९ ॥ नमस्तुभ्यंसुरेशायनमस्तुभ्यंपरात्मने ॥ जगत्संहारकर्त्रेवैजगत्पालायतेनमः ॥ ७०
नमस्त्रिशूलहस्तायनागयज्ञोपवीतिने ॥ नरमुंडसुमाल्यायचंद्रार्द्धकृतशेखर ॥ ७१ ॥ ॥ स्कंदउवाच ॥ ॥ इदंस्तोत्र
पठेत्प्रातःसमुत्थायकृतांजलिः ॥ संपदस्तस्यजायंतेदुःस्वप्नादिविनश्यति ॥ ७२ ॥ इतिस्तुतोवैदक्षेणमहादेवःप्रभुप्रभुः ॥
उवाचमधुरंवाक्यंसंतुष्टश्चतदाभवत् ॥ ७३ ॥ ॥ श्रीशिवउवाच ॥ ॥ वरंब्रूहिवरंब्रूहिसंतुष्टस्तवसांप्रतम् ॥ स्तुत्याच
कृतयादक्षत्वयानघ्रधियाविभुः ॥ ७४ ॥ ॥ दक्षउवाच ॥ ॥ महादेवमहादेवप्रसन्नोऽसियदीश्वर ॥ त्वत्पादकमलेभक्ति
र्ममजन्मनिजन्मनि ॥ ७५ ॥ भूयाच्चवरतीर्थंतुमहापातकनाशनम् ॥ यस्यसंदर्शनादेवब्रह्महत्यादिकानिच ॥ ७६ ॥ पा
पानिप्रशमंयांतुयदितेमय्यनुग्रहः ॥ स्थितिश्चभवतोनित्यंक्षेत्रेभवतुसर्वदा ॥ ७७ ॥ सतीदेव्याःपुनर्देहःक्षिप्रंभवतुमाचि
रम् ॥ त्वयासहविवाहश्चतथाभवतुमानद ॥ ७८ ॥ ॥ श्रीशिवउवाच ॥ ॥ सम्यक्संपादितादक्षमद्भक्तिर्विश्वपाव ॥ ११ ॥
नी ॥ भविष्यत्येवहिनामयथायाज्ञाकृतात्वया ॥ ७९ ॥ इदंक्षेत्रंमहापुण्यंयावद्वैयज्ञभूमिका ॥ यत्रमायानिमित्तंहिजातंस

वैप्रजापते ॥ ८० ॥ तस्मादिदंमहाक्षेत्रंमायासंज्ञंभविष्यति ॥ सकृद्दर्शनमात्रेणयस्यतीर्थस्यमानद ॥ ८१ ॥ यस्यस्म
रणमात्रेणसर्वपापैःप्रमुच्यते ॥ धन्यास्तेपुरुषालोकेमायाक्षेत्रनिवासिनः ॥८२ ॥ नाम्नादक्षेश्वरेणैवनिवसिष्यामिक्षेत्रके ॥
यस्यदर्शनमात्रेणसिद्धयोऽष्टौभवंतिहि ॥ ८३ ॥ अदृष्ट्वामांमानवायेकरिष्यंत्यल्पबुद्धयः ॥ तीर्थाटनंप्रजाधीशतत्सर्वंविफ
पार्वतीकी उत्पत्तिः
लंभवेत् ॥ ८४ ॥ श्रीदेव्याप्रभवश्चापिभविष्यतिहिमाचले ॥ तयाममविवाहश्चभविष्यतिनसंशयः ॥ ८५ ॥ ॥ स्कंद
उवाच ॥ ॥ इत्युक्त्वाभगवान्देवोगृहीत्वातत्सतीवपुः ॥ स्कंधेकृत्वाययौविप्रकैलासेगुह्यकालये ॥ ८६ ॥ ततोवधिमहा
भागमायाक्षेत्रंबभूवह ॥ त्रिषुलोकेषुपुण्यंचयत्रमायासतीवपुः ॥ ८७ ॥ द्वादशयोजनायातंयज्ञस्यायतनंद्विज ॥ तत्प्रमा
णंमहाभागबभूवक्षेत्रमुत्तमम् ॥ ८८ ॥ अस्मिन्क्षेत्रेऽर्द्धमासेतुशिवसंन्यस्तमानसः ॥ प्राप्नोतिशिवसायुज्यंकिमन्यैर्बहुभा
षितैः ॥ ८९ ॥ दक्षेश्वरंमहादेवंसकृद्वैप्रणमंतिये ॥ नंदीभृंग्यादिभिस्तुल्याभूयान्मानवसत्तमः ॥ ९० ॥ पंचाक्षरंतथामंत्रं
षडक्षरमथापिच ॥ प्रजापतेरहोरात्रैस्त्रिभिःसिद्धिमवाप्नुयात् ॥ ९१ ॥ इतितेकथितोविप्रमायाक्षेत्रभवोमया ॥ यच्छ्रुत्वापि
नरोभक्त्याशिवसालोक्यभाग्भवेत् ॥९२॥ इ०स्कं०केदारखंडेमायाक्षेत्र०यज्ञसंधानतीर्थोत्पत्तिर्नामपंचमोऽध्यायः ॥५॥
॥ स्कंदउवाच ॥ ॥ इदंतीर्थंमहापुण्यमभूद्गंगागमेपुनः ॥ गंगाद्वारमितिख्यातंस्मरणात्पापनाशनम् ॥ १ ॥ महाभगी

रथोराजासूर्यवंशधरःप्रभुः ॥ आनयामासस्वर्गाद्वैगंगांपरमपावनीम् ॥ २ ॥ स्वर्गान्निपतितागंगापृथिव्यामागतायदा
॥ तदैवास्यद्विजश्रेष्ठगंगाद्वारमितिश्रुतम् ॥ ३ ॥ गंगाद्वारोत्तरंविप्रस्वर्गभूमिःस्मृताबुधैः ॥ सान्यत्रपृथिवीप्रोक्तागंगाद्वा
रोत्तरंविना ॥ ४ ॥ इदमेवमहाभागस्वर्गद्वारंस्मृतंबुधैः ॥ यस्यदर्शनमात्रेणविमुक्तोभवबंधनैः ॥ ५ ॥ ब्रह्मविष्णुमहे
शाद्यादेवानित्यंप्रतिष्ठिताः ॥ मुनयःसिद्धगंधर्वागुह्यकाप्सरसांगणाः ॥ ६ ॥ तिष्ठंत्यत्रैवभगवंश्छेत्तुंसंसारबंधनम् ॥ सं
सारतापतप्तानांभेषजंतीर्थमुत्तमम् ॥ ७॥ पापानिशतसंख्यानिब्रह्महत्यासमानिच ॥ कृत्वान्यत्रप्रयांत्यस्मिन्मृतोमोक्षम
वाप्नुयात् ॥ ८ ॥ शृणुनारदवक्ष्यामिकथांतापप्रणाशनीम् ॥ यथाचांडालतुल्योऽपिकश्चिद्ब्राह्मणवंशजः ॥ ९ ॥ प्राप
वैपरमंस्थानंब्रह्माविष्णुशिवात्मकम् ॥ अस्यक्षेत्रस्यविभवात्तच्छृणुष्वमहामते ॥ १० ॥ बभूवब्राह्मणःकश्चिदवंत्यांमुनिस
तम ॥ अश्मचित्तइतिख्यातःसार्थनामाद्विजाधमः ॥ ११ ॥ पूर्वंतुजातमात्रस्यपितायमवशंगतः ॥ यदाजातोभाग्यहीनःपंचव
र्षात्मकोद्विजः ॥ १२ ॥ मातापंचत्वमापन्नासजातीनांवशंगतः ॥ उपनीतोपितैर्विप्रैःसंध्यानैवचकारह ॥ १३ ॥ लोलया
संबभूवाथचौरकर्मणिसद्विजः ॥ गतोदेशांतरंसोपिचौरैश्चसहसंगतः ॥ १४ ॥ तैरेववर्धितोविप्रतदाचौरोद्विजाधमः ॥ ते
षांवैतस्कराणांचसदामध्यगतोहिसः ॥ १५ ॥ चकारदुष्टकर्माणिस्त्रीब्राह्मणवधादिकम् ॥ पथिकानांकालरूपोदुर्बलानां

स्यपिष्टभुक् ॥ ५१ ॥ देवाःसर्वेपिसर्वांगाभवंतुविगतज्वराः ॥ पूष्णोदंताबाहवश्चदस्रयोःकृत्तहस्तकाः ॥ ५२ ॥ भवंतुऋजवःस
र्वेभृगुर्वैश्मश्रुवान्भवेत् ॥ अन्येपिविकृताःसर्वेस्वस्थास्तेहिभवंतुच ॥ ५३ ॥ ॥ स्कंदउवाच ॥ ॥ इत्युक्तवतिदेवेशेसर्वेदेवाः
सवासवाः ॥ साधुसाधुब्रुवंतस्तेगृणंतोगिरिजापतिम् ॥ ५४ ॥ ततोदेवंसहामंत्र्यसर्वेदेवाःसवासवाः ॥ आजग्मुःसशिवाय
ज्ञमस्मिन्क्षेत्रेमहाशयाः ॥ ५५ ॥ संविधायचतत्सर्वंयदाहभगवान्हरः ॥ सवनीयपशोस्तस्यशिरोदक्षस्यसंदधुः ॥ ५६ ॥ संधी
यमानेतच्छीर्षेदक्षोनामप्रजापतिः ॥ शिवाभिवीक्षितःशीघ्रमुत्तस्थौसहसाभुवि ॥ ५७ ॥ सददर्शमहारुद्रंतद्द्वेषकलुषीकृतः
॥ तद्दर्शनादभूत्स्वच्छोयथावैशारदोन्हदः ॥ ५८ ॥ शिवस्तवायकृतधीर्नाशक्नोद्बाष्पगद्गदः ॥ सुतांपरेतांहिसतींस्मरन्दुःखेन
पीडितः ॥ ५९ ॥ प्रेमविव्हलतांप्राप्तोमुहूर्तंप्राप्तसंज्ञकः ॥ निर्व्यलीकेनमनसातुष्टावपरमेश्वरम् ॥ ६० ॥ ॥ दक्षउवाच ॥
॥ अनुग्रहस्तुभवताकृतोवैममसांप्रतम् ॥ युक्तोदंडस्त्वयासत्सुकर्तव्योभूतिमिच्छता ॥ ६१ ॥ अवज्ञायाकृतादेवमयातेपा
पबुद्धिना ॥ मोहितोनितरांदेवमाययाभवतःप्रभो ॥ ६२ ॥ नमस्तुभ्यंभगवतेनिर्गुणायमहात्मने ॥ निरंजनायशांताययोगि
नांपतयेनमः ॥ ६३ ॥ मीढुष्टमायपतयेसर्वायसुकृतेनमः ॥ हिरण्यरेतसेतुभ्यंहिरण्यपतयेनमः ॥ ६४ ॥ हिरण्यकृतबंधा
यहिरण्यपशुमर्दिने ॥ हिरण्यमृगहंत्रेचहिरण्यार्द्धविमोहिने ॥ ६५ ॥ अग्निवर्णायतेदेववन्हिनेत्रायतेनमः ॥ वन्हौकृतनि

॥तद्गृहीत्वावयंसर्वेमारयित्वाखिलांश्चतान् ॥ ३१ ॥ गमिष्यामोन्यदेशेहिमुहूर्तंसंप्रतीक्ष्यताम् ॥ वर्ततेबहुलंवित्तंयस्मात्तेमु
खकांतयः ॥ ३२ ॥ ॥ स्कंदउवाच ॥ ॥ इत्युक्त्वाविररामासावश्मचित्तःसुदुर्मतिः ॥ प्रशशंसुर्मुदातंवैसर्वेचौराःसख
ड्गकाः ॥ ३३ ॥ श्रुत्वारागयुताश्चौरावचोरागसमाकुलं ॥ मोहिताः संबभूवुश्च श्रवणेकृतमानसाः ॥ ३४ ॥ उत्तमश्लोकश्रवणो
द्भूतपापोद्विजस्तदा ॥ उवाचवचनंचौरानिदंवैमुनिसत्तम ॥ ३६ ॥ ॥ अश्मचित्तउवाच ॥ ॥ प्रष्टुंगच्छाम्यहंतत्रमुनि
वर्गान्हितस्कराः ॥ तत्सर्वंनिश्चयंज्ञात्वागच्छामिसत्वरंपुनः ॥ ३७ ॥ ॥ चौराऊचुः ॥ ॥ कथंयास्यसिभोविप्रसमाजेत
स्करंखलु ॥ ज्ञात्वावैमारयिष्यंतित्वांतथामुनयस्तरां ॥ ३८ ॥ परोक्षस्थायिनश्चौराभवंतितस्करोत्तम ॥ प्रत्यक्षतामधिग
ताजायंतेनाशितास्तदा ॥ ३९ ॥ ॥ अश्मचित्तउवाच ॥ ॥ छद्मनातत्रगच्छेऽहंयत्रब्राह्मणसत्तमाः ॥ जानीयुर्मायथा
चौराःकरोमिव्याजमीदृशम् ॥ ४० ॥ ॥ स्कंदउवाच ॥ ॥ इत्युक्त्वासहसासोपित्यक्तशस्त्रास्त्रकाणवः ॥ चीरांबरोश्म
चित्तश्चबभूवद्विजवेषधृक् ॥ ४१ ॥ सगत्वातत्रदेशेतुयत्रतेब्राह्मणाःस्थिताः ॥ नमश्चकारतेभ्यश्चविनयावनतोभवत् ॥ ४२
अंतर्दुष्टोबहिःशांतोरुद्रमालाविभूषितः ॥ तिर्यग्पुंड्रधरोविप्रोयथाब्राह्मणसत्तमः ॥ ४३ ॥ श्रुत्वाश्रुत्वास्यक्षेत्रस्यमाहात्म्यं ॥ १३ ॥
द्विजसत्तम ॥ विस्मृतश्चौरकर्माणिसत्संगविरतोद्विज ॥ ४४ ॥ तत्संगादश्मचित्तोसौभक्तिमान्संबभूवह ॥ भक्तौसंजातमा

त्रायांप्रणनामद्विजोत्तमान् ॥ ४५ ॥ ॥ अश्मचित्तउवाच ॥ ॥ महापापोऽस्मिमुनयोगच्छामिनिरयार्णवे ॥ गच्छंतंमां
महाभागारक्षध्वंद्विजसत्तमाः ॥ ४६ ॥ ॥ स्कंदउवाच ॥ ॥ इत्याकर्ण्यवचस्तस्यमुनयोविस्मयान्विताः ॥ ऊचुःपरस्परं
कोऽयंमहापापोस्मियोवदत् ॥ ४७ ॥ तमप्यूचुर्महाभागपतितंपादसन्निधौ ॥ अश्मचित्तंमहाभागाःकृपयापरयायुताः
॥ ४८ ॥ ॥ ब्राह्मणाऊचुः ॥ ॥ भोभोःपुरुषकस्त्वंवैकुतोवात्वमुपागतः ॥ कस्माद्गच्छसिनरकंपापकर्मफलंतथा ॥ ४९ ॥
॥ अश्मचित्तउवाच ॥ नजानामिकुलंशीलंस्वस्यवैपापकर्मणः ॥ अश्रौषंब्राह्मणाज्जन्मततश्चौरोभवंतथा ॥ ५० ॥ कथं
स्यान्निष्कृतिर्मेऽद्यतंब्रूतममसांप्रतं ॥ अन्यथासर्वदाविप्रागच्छामिनरकंध्रुवम् ॥ ५१ ॥ ॥ स्कंदउवाच ॥ ॥ इत्युक्त्वाश्रुपरी
ताक्षःपपातचरणेषुसः ॥ तंदृष्ट्वातेपिमुनयःप्रोचुस्तंविप्रवंशजम् ॥ ५२ ॥ ॥ मुनयऊचुः ॥ ॥ अहोधन्यतमोसित्वंयोवै
क्षेत्रमुपागतः ॥ शमंयातानिपापानितवेदानींद्विजर्षभ ॥ ५३ ॥ अस्माद्वैपूर्वभागेयोगंगातीरेमहागिरिः ॥ तत्रगत्वामहाभा
गमहादेवपरोभव ॥ ५४ ॥ संतुष्टेतुमहादेवेसर्वंसंपादयिष्यति ॥ अतोऽस्मद्वचनात्तूर्णंगच्छतत्रमहाशय ॥ ५५ ॥ ॥ अ
श्मचित्तउवाच ॥ ॥ नजानामिमुनिश्रेष्ठाःसत्कर्ममुनिवंदितः ॥ येनाहंस्यांमहाभागाएतद्ब्रूतममार्यकाः ॥ ५६ ॥ ॥ मुनय
ऊचुः ॥ ॥ महादेवमहादेवमहादेवेतिचासकृत् ॥ स्मरन्वैमनसादेवंवदसर्वमनिंदितम् ॥ ५७ ॥ कृतकृत्योमहाभागभ

विष्यसीहहेद्विज ॥ तस्मात्सर्वप्रयत्नेनभजशर्वंहिसर्वदा ॥ ५८ ॥ ॥ स्कंदउवाच ॥ ॥ इतिश्रुत्वानिगदितंतेषां
वैदेवतात्मनाम् ॥ जगामहोन्मुखस्तत्रपर्वतेमुनिदर्शिते ॥ ५९ ॥ तत्रगत्वामहेशानंसस्मारमनसाविभुम् ॥ महादेवमहादे
वमहादेवेतिचासकृत् ॥ ६० ॥ वदन्वैसप्तरात्रेणददर्शशिवमुत्तमं ॥ व्याघ्रचर्मपरीधानंवृषस्थंनीललोहितम् ॥ ६१ ॥ अने
कसर्पसर्वांगंनानाप्रमथसेवितम् ॥ उवाचमधुरंवाक्यमश्मचित्तंसदाशिवः ॥ ६२॥ ॥ श्रीशिव उवाच ॥ ॥ उत्तिष्ठव
त्सभद्रंतेधन्योसिममनामतः ॥ वरंवृणीष्वसततंवरदोस्मितवद्विज ॥ ६३ ॥ ॥ अश्मचित्तउवाच ॥ ॥ स्तोतुमुत्स
हतेमेद्यमनोदेवविभोशिव ॥ परंमूर्खोस्मिहेनाथकथंस्तौमिभवापहम् ॥ ६४ ॥ ॥ शिवउवाच ॥ ॥ पुराणन्या
यमीमांसाःसांख्यधर्मव्यवस्थितिः ॥ तथैववेदाश्चत्वारस्तथायुर्वेदउत्तमः ॥ ६५ ॥ गांधर्वंचार्थशास्त्रंचधनुर्वेदस्तथास्मृ
तः ॥ एताःसर्वाःमहाविद्याभवंतुतवसांप्रतम् ॥ ६६ ॥ ॥ स्कंदउवाच ॥ ॥ उक्तमात्रेभगवतिसर्वज्ञेसर्वदेभवे ॥
आविर्बभूवुस्तस्यापिविद्याअष्टादशैवतु ॥ ६७ ॥ ज्ञात्वास्वरूपमत्यर्थंभवस्यपरमात्मनः ॥ अस्तौषीज्जगदानंदंजगत्सं
हारकारकम् ॥ ६८ ॥ ॥ अश्मचित्तउवाच ॥ ॥ वंदेहंभवभयहरंमहेशमीशंभावाभावैरहितमजंविभुंवरेण्यम् ॥
॥ ६९ ॥ अगणितगुणमहिमानंपारगंसर्वनाथंविविधभुजगशोभंपर्वतेशंविभांतम् ॥ ७० ॥ सुरदनुजमुनीनांयोनिमी

तथैवच ॥ १६ ॥ येनकेनप्रकारेणधनार्जनपरोऽभवत् ॥ सर्वंब्राह्मणलिंगंहिप्रणष्टंतस्यदुर्मतेः ॥ १७ ॥ विरूपोऽपिबभू
वासौनष्टेब्राह्मणकर्मणि ॥ कुब्जोतिरूक्षसर्वांगोविनष्टस्नानसंध्यकः ॥ १८ ॥ श्यामोमहच्छिरादुष्टःस्वल्पदेहोनृशंसकः ॥
सदापरशुहस्तश्चचर्महस्तस्तथैवच ॥ १९ ॥ वनेवासोनतस्यापिमित्रसंबंधिबांधवाः ॥ नासन्नारदकुत्रापिभ्रष्टस्यहिदुरात्म
नः ॥ २० ॥ एकदासमहादुष्टोमृगास्योतिभयानकः ॥ चौरैश्चबहुभिःसार्द्धंमायाक्षेत्रेनराधमः ॥ २१ ॥ निशीथसमयेत
त्रकर्तुंचौर्यंसमागतः ॥ स्थितास्तत्रमहात्मानःसमाजेमहतिस्थिते ॥ २२ ॥ माहात्म्यश्रवणेसर्वेमायाक्षेत्रस्यनारद ॥ सं
न्यस्तमानसास्तत्रश्रीशिवेभक्तिसंयुताः ॥ २३ ॥ श्रुत्वातीर्थप्रशंसांवैमुदापरमयायुताः ॥ प्रशंसंतोमुहुश्चैवाहोहोपुण्यतमा
वयम् ॥ २४ ॥ परस्परंमोदमानाऋषयोब्राह्मणादयः ॥ अहोधन्यतमालोकेआगच्छंतोमहास्थले ॥ २५ ॥ तैरेवसुकृतंपू
र्वंकृतमेवनसंशयः ॥ इत्येवसंवदंतस्तेऊचुर्माहात्म्यमुत्तमम् ॥ २६ ॥ इतिश्रुत्वावचस्तेषांसर्वेषांमुनिसत्तम ॥ चौरान्सर्वान्ब्रवी
द्वाक्यमश्मचित्तोद्विजाधमः ॥ २७ ॥ ॥ अश्मचित्तउवाच ॥ ॥ भोभोश्चौराःशृणुध्वंमेवचःकार्यकरंपरम् ॥ प्रशंसंतिक
थंस्थानमिदमेतेद्विजातयः ॥ २८ ॥ धनंनूनंमहाभागाःस्थापितंवैभविष्यति ॥ तेनैतेब्राह्मणाःसर्वेप्रशंसंतिमुहुर्मुहुः ॥ २९ ॥ श्रूय
तामेकचित्तैश्चभवद्भिर्वचनोत्तमम् ॥ कुत्रवैस्थापितंचौराधनमेभिर्द्विजातिभिः ॥ ३० ॥ स्वयंवैसंवदिष्यंतिनिश्चयंचौरसत्तमाः

ष्टपर्वतश्रेष्ठतांगतः ॥ अद्यापितत्प्रदेशेहिशंखध्वनिरहर्निशम् ॥ ८३ ॥ श्रूयतेपुण्यकैर्विप्रतथावैशिवलिंगकम् ॥ दृश्यतेमु
निशार्दूलप्रत्यक्षंदर्शितोमया ॥ ८४ ॥ तंपर्वतंसकृद्दृष्ट्वासर्वपापैःप्रमुच्यते ॥ एतदुद्देशतःप्रोक्तंमाहात्म्यंतवसुव्रत ॥ ८५ ॥
कोवासाकल्यभावेनवक्तुंशतमुखैरपि ॥ अश्मचित्तस्यचरितंकथयिष्यंतियेनराः ॥ इहचैवपरामृद्धिंमृताःस्वर्गमवाप्नुयुः ॥
॥ ८७ ॥ इतिश्रीस्कंदपुराणेकेदारखंडेनीलपर्वतमाहात्म्यंनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥
॥ स्कंदउवाच ॥ ॥ बिल्वपर्वतमाहात्म्यंशृणुनारदभक्तितः ॥ तच्छ्रुत्वापिद्विजश्रेष्ठपुण्यंप्राप्नोतिदुर्लभम् ॥ १ ॥ शिवधा
रासमाख्याताशिवदातत्रपर्वते ॥ तस्यांनरःसकृत्स्नात्वाशिवेनसदृशोभवेत् ॥ २ ॥ तत्रैकोबिल्ववृक्षस्तुतस्याधःशिवलिंग
कम् ॥ यस्यदर्शनमात्रेणशिवतांयातिमानवः ॥ ३ ॥ लिंगस्यदक्षिणेभागेनित्यंतिष्ठतिनारद ॥ अश्वतरोमहानागोमणिभू
षितमस्तकः ॥ ४ ॥ रंध्रात्पातालमाविश्यसकरोतिगतागतम् ॥ कदाचिन्मुनिरूपेणकदाचिन्मृगरूपधृक् ॥ ५ ॥ स्नानंक
रोतिसर्वत्रतीर्थेषुमुनिसत्तम ॥ वामभागेचतस्यापिगुहापाषाणमुद्रिता ॥ ६ ॥ तस्यांवसतिधर्मात्मायोगिनांप्रवरोमुनिः ॥
नाम्नाऋजीकइतिवैख्यातोब्रह्मविदांवरः ॥ ७ ॥ योगयुक्तोमहात्मासौशिवसंन्यस्तमानसः ॥ आस्तेस्थावरवद्योगीब्रह्म
भूतोविकल्मषः ॥ ८ ॥ तल्लक्षणंशृणुप्राज्ञयस्मात्तेप्रत्ययोभवेत् ॥ निशीथसमयेतत्रचतुर्दश्यांहिकृष्णके ॥ ९ ॥ पक्षेवैश्राव
णेमासेज्योतिर्वैदृश्यतेमहत् ॥ श्रूयतेकलकलाशब्दःपुण्यैस्तत्राप्यदर्शनम् ॥ १० ॥ ॥ नारदउवाच ॥ ॥ विभोषण्मु
खदेवेशजातोमेविस्मयःपरः ॥ किंतज्ज्योतिश्चशब्दश्चसर्वंतत्कथ्यतांमम ॥ ११ ॥ ॥ स्कंदउवाच ॥ ॥ पुराराजाबभूवा
थकलिंगेविश्वदत्तकः ॥ एकदासमुनिश्रेष्ठमृगयायैगतःस्वयम् ॥ १२ ॥ हतास्तेनमृगाश्चैवबहवःसिंहसूकराः ॥ दैवाज्जा
तोमहाभागएकाकीसनराधिपः ॥ १३ ॥ परिश्रांतोनृपस्तत्रवनेनरविवर्जिते ॥ ददर्शससरोयुग्मंशतपत्रैश्चशोभितम् ॥
॥ १४ ॥ नानामृगगणाकीर्णंहंसकारंडवैर्युतम् ॥ सतांमनःस्वच्छजलंजलकुक्कुटशोभितम् ॥ १५ ॥ कोयष्टिकैश्चक्रवाकैः
क्रौंचैरन्यैश्चपक्षिभिः ॥ नादितंकलशब्दैश्चतथाकोकिलकूजितैः ॥ १६ ॥ स्थित्वाराजासरस्तीरेपरिश्रांतोमहामुने ॥ जलं
पीत्वाहितत्रस्थंयावद्गच्छातिभूमिपः ॥ १७ ॥ तावत्प्राप्तोद्विजश्रेष्ठःसोत्तरीयाजिनांबरः ॥ दृष्ट्वातंसहसाराजासमुत्तस्थौतदा
सनात् ॥ १८ ॥ संपूज्यवाक्यसंलापैर्विप्रवर्यंनराधिपः ॥ उवाचवचनंराजाविस्मयोत्फुल्ललोचनः ॥ १९ ॥ ॥ राजोवा
च ॥ ॥ विप्रवर्यमहाभागकुत्रगंतासितद्वद ॥ सतांसप्तपदीमैत्रीवर्ततेमुनिनंदन ॥ २० ॥ ॥ ब्राह्मणउवाच ॥ ॥ शृणु
राजन्प्रवक्ष्यामियदुक्तंवचनंत्वया ॥ एकोव्यापीजगत्सर्वंमित्रामित्रविवर्जितः ॥ २१ ॥ कुत्रतद्गमनंविद्यांकस्थितिःपरमा
त्मनः ॥ कोवामित्रममित्रंवाएकस्यनिखिलात्मनः ॥ २२ ॥ किंब्रुवेहंमहाराजत्वदुक्तस्योत्तरंविभो ॥ विशेषंनाधिगच्छामि

शिवस्यपरमात्मनः ॥२३॥ ॥राजोवाच॥ ॥किंत्वयाहिद्विजश्रेष्ठकृतासेवामहात्मनां ॥ योगिनांयस्यतेबुद्धिरद्वैता
मृतवर्षिता ॥२४॥ कथंप्राप्तंत्वयाज्ञानंशिवस्यपरमात्मनः॥ धन्योऽसिकृतकृत्योऽसियस्यतेज्ञानमीदृशम् ॥२५॥ सम
तासर्वभूतेषुशत्रुमित्राप्तबंधुषु॥ कथंसंजायतेतन्मेप्रयत्नेनवदस्वभोः ॥ २६ ॥ ॥ब्राह्मणउवाच॥ ॥साधुसंगतिरेवा
त्रकारणंवसुधाधिप॥ तन्मूर्तिषुसदाध्यानंतत्तन्नामाभिकीर्तनम् ॥ २७ ॥ ॥राजोवाच॥ ॥ अहमप्यागमिष्यामित्व
यासहद्विजोत्तम॥ त्वत्समोनास्तित्रैलोक्येसाधूनांसाधुरुत्तमः ॥ २८॥ ॥ब्राह्मणउवाच॥ ॥ त्वंतुराजामहाभागभि
क्षूणांकल्पवृक्षकः॥ कथंस्थास्यसिविपिनेकंदपर्णफलाशने ॥२९॥ राज्यंपालयधर्मेणप्रजाःपुत्रानिवौरसान् ॥ मनोन्य
स्यमहादेवेसर्वज्ञेजगदीश्वरे॥ ३०॥ सर्वकर्मफलत्यागीब्राह्मणानांचपूजकः॥ भजराजन्स्वयंदेवंयास्यसिसुतरांप्रभुम् ॥
॥३१॥ ॥राजोवाच॥ ॥भगवन्द्विजशार्दूलबुद्धिरस्मादृशांमुने॥ मूढाल्पज्ञानबोधेनश्रद्धानैवोपजायते ॥ ३२॥ तद्व
दस्वमहाभागसम्यग्जानामितद्यथा॥ प्रायशःसुधियःसंतोभवंत्येवोपकारिणः॥३३॥ ॥ब्राह्मणउवाच॥ ॥ क्रिया
कालोममप्राप्तोराजन्भोविश्वदत्तक॥ इदानींतीर्थकेपुण्येमायाक्षेत्रेप्रयाम्यहम्॥ ३४॥ त्वमप्यागच्छतत्रैवबोधार्थंपरमात्म ॥१६॥
नः॥ ऋजीकोमुनिवर्यस्तुगतोवैबिल्वपर्वते ॥३५॥ शिवस्यवामभागेतुगुहागुप्ततमानृप ॥ तस्यांयोगिवरोनित्यंवसति

शंपृथिव्याःसकलनिगमकथितरूपंपार्वतीशंनमामि ॥ ७१ ॥ यदुदरकुहरमध्येप्रेरितावातनाथैस्तनुजपुलकमार्गैर्ब्र
ह्मणोंडाविशंति ॥ रविकरनिकरशुभजालैर्जालमध्येयथावैलघुतरमणुकुलानिप्रेरितानीशमीडे ॥ ७२ ॥ विभोतेरूपंभ
सितसितमहोमेहृदिसदाभवेद्वैब्रह्मात्रिभुवनगशुभदंबालशशिनः ॥ इमौहस्तौमेतेसुभगपदपूजांवितनुतांशिरोमेदेवेशंभ
वभयहरंत्वांप्रणमतु ॥ ७३ ॥ पूर्वंतवेशभगवन्भवदेवदेवब्रह्मारमेशौतवइष्टमंतम् ॥ गतौप्रभोरूर्द्ध्वमधश्चलोकेगतंनचा
हंहिकियान्मनुष्यः॥७४॥ ॥स्कंदउवाच ॥ ॥ इमंस्तवंमहेशस्यप्रीतःप्रातस्तुयःपठेत् ॥ मूर्खोपिलभतेविद्यांयथा
सावइमचित्तकः॥ ततःप्रसन्नोभगवान्महादेवोब्रवीद्द्विजम्॥७५॥ प्रहस्यस्तोत्रराजेनसंतुष्टोजगदीश्वरः ॥ ७६॥ ॥
॥श्रीमहादेवउवाच॥ ॥गच्छगच्छहिकैलासेप्रमथेश्वरतांव्रज॥ तुष्टोऽस्मितवएतेनभक्त्याचकृतयातव॥७७॥ ममा
र्द्धनामकोभूयाद्गणश्चद्विजसत्तम॥ नाम्नानीलइतिख्यातिंयास्यतिभुविचोत्तमां॥७८॥ अस्यवैगिरिराजस्यनामैवसंभवि
ष्यति ॥ नीलपर्वतइतिवैस्मरणाच्छिवदायकः॥७९॥ अत्रवैनिवसिष्यामित्वयासहगणेश्वरः ॥ नीलेश्वरइतिख्यातोभ
क्तानांप्रीतिवर्द्धनः॥८०॥ गंगातीरेमहत्कुंडंवर्ततेममसर्वदा॥ तत्रापिस्नानमात्रेणममरूपोनसंशयः ॥८१॥ ॥स्कंद
उवाच॥ ॥इत्युक्त्वाभगवान्देवोमहादेवोययौगिरिम्॥ तेनसार्द्धंगणैश्चैवस्तूयमानःसुरासुरैः॥८२॥ तस्माद्यंद्विजश्रे

॥ इति केदारखण्डस्थमायापुरीमाहात्म्यं समाप्तम् ॥